**श्रीसुरसरस्वतीसभा, शृङ्गेरी**

**प्रवेशपरीक्षा – प्रथमपत्रिका**

**दिनाङ्कः- 03-09-2023** **पूर्वाह्णः १०.०० तः १.०० पर्यन्तम्**

**समयः- होरात्रयम्** **अङ्काः - १००**

**सूचना - सर्वाणि उत्तराणि संस्कृतेन एव भवेयुः**

1. **अष्टानाम् एकवाक्येन उत्तरं लिखत ।** 8

१. कमलजदयिताष्टकं कस्मिन् ग्रन्थे प्रकाशितमस्ति ?

२. हरः कस्मिन् नगरे समदृश्यत ?

३. पातालस्वामी कस्य शिष्यः ?

४. भीष्मस्य प्रथमं नाम किम् ?

५. शुकनासः कमुपदिदेश ?

६. किरातार्जुनीयस्य रचयिता कः ?

७. कां दृष्ट्वा पुरूरवाः मोहितः अभवत् ?

८. कालिदासस्य खण्डकाव्ये के ?

९. चन्द्रकेतोः पिता कः ?

१०. जीमूतवाहनः कं ररक्ष ?

2. **षण्णां वाक्यद्वयेन उत्तरं लिखत ।** 12

१. गुरुशिष्यकलहमाकर्ण्य के के समागताः ?

२. भवभूतेः पिता, जननी, पितामहः, गुरुश्च के आसन् ?

३. समुद्रवेला कीदृशी वर्तते ?

४. मणिहर्म्यपृष्ठे काशीराजपुत्री राजानं किमाह ?

५. महाभारतवस्तु किम् ? तत्र के विषयाः वर्णिताः ?

६. राजा प्रदोषसमये मणिहर्म्यपृष्ठं कुतः आरुरोह ?

७. यदा भीष्मः परशुरामेण ताडितः तदा अम्बा किमकरोत् ?

८. कुतः अप्सरसः उच्चैः चुक्रुशुः ?

**3. त्रयाणां पञ्चषैः वाक्यैः उत्तरं लिखत । 9**

१. लक्ष्मीः कान् कान् परिहरति ?

२. मतिमान् कीदृशस्य द्विषः समुन्नतिं समुपेक्षेत ? कुतः ?

३. यदा मन्दाकिनी रथरश्मीन् जग्राह तदा भीष्मः किमवदत् ?

४. प्रभाकरवर्धनः दिनकरसेवां कथं चकार ?

५. लक्ष्मीः पुष्पभूतेः कीदृशं वरमदात् ।

**4. त्रयाणां सप्रसङ्गं विवरणं कुरुत । 9**

१. "अनुजग्राह कुलं कुटुम्बिनाम्।"

२. "माननीयश्च गुरुवत् न उल्लङ्घनमर्हति गुरोः आसनम्।"

३. "प्रायेण परोत्कर्षासहिष्णवः लोकाः।"

४. "न तितिक्षा सममस्ति साधनम्।"

५. "कदाचित् प्रमादोऽपि प्रमोदाय कल्पते।"

**5. पद्यद्वयं पूर्णं लिखत । 6**

१. कर्मस्वात्मोचितेषु ----------------------------देहि मह्यम्॥

२. सच्चित्स्वरूपात्मनो मे --------------------------- देहि मह्यम्॥

३. स्पृहणीयगुणैः ---------------------- समुन्नतेः॥

**6. एकस्य पद्यस्य सान्वयं अर्थं लिखत। 4**

१. अहो प्रासादिकं रूपमनुभावश्च पावनः ।
स्थाने रामायणकविः देवीं वाचं व्यवीवृतत् ॥

२. करुणैकमयः कलानिधिः सुलभस्सुन्दरमूर्तिरुज्वलः ।
अवलोकित एव देहिनामहरद्वाङ्मनसे स तापसः ॥

**7. एकस्य कवेः देश-काल-कृति-वैशिष्ट्य-विषये लिखत । 4**

१. बाणभट्टः २. भारविः

**8. चतुर्णां रूपाणि परिचाययत। 4**

१. वाणी २. विमृश्य ३. शरान्

४. कवची ५. देवर्षौ ६. राज्ञि

**9. चत्वारि पदानि वाक्ये योजयत।** 4

१. कुप्यति २. दिवसे ३. निरयासीत्

४. प्रणम्य ५. प्रहर्तुम् ६. रेणुः

**10. चतुर्णां पर्यायपदानि लिखत।** 4

१. कुसुमशरः २. दरी ३. द्विरदः

४. अभ्रम् ५. कैवर्तः ६. सप्तजिह्वा

**11. चतुर्णां सन्धिं विभज्य सन्धिनाम लिखत।** 6

१. लोकानिव २. दर्शनीयोऽयम् ३. वाङ्मनसे

४. इत्यवेहि ५. अम्बेव ६. चक्रराजासनः

**12. चतुर्णाम् एकं पदं लिखत।** 4

१. धर्मरूपस्य २. इन्दुमण्डलस्य ३. गुरूपदेशान् विना जानाति

४. तरुणतृणविशिष्टदेशः ५. दन्तुरतारहितमृदुलः ६. चन्दनवत् शीतलः

**13. चतुर्णां व्याकरणविशेषं लिखत।** 8

१. अवतिष्ठन्ते २. शेषमयम् ३. यस्येदमभितः

४. जलधिमयः ५. मोदकाय स्पृहयति ६. भवान् पठतु

**14. चतुर्णां विग्रहवाक्यानि विलिख्य समासनामानि लिखत।** 8

१. यथाशक्ति २. कुसुमनिकरैः ३. कुशलवगुरवः

४. राजकुमारस्य ५. श्वेताम्बरः ६. शीतोष्णम्

**15. द्वयोः तत्तल्लकारस्य सर्वाणि रूपाणिलिखत।** 6

१. ददातु २. समदृश्यत ३. कारयामास

**16. चतुर्णां रिक्तस्थानानि पूरयत।** 4

१. अनुजग्राह------------ कुटुम्बिनाम्। २. पञ्जरकेसरेषु -------- अरमत।

३. अनाघ्माता -------------- विरेसुः। ४. अम्बिका ----------- पत्नी।

५. ----------- पुनल्वेलीग्रामे जातः।

---------------------